# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्
# सत्रान्तपरीक्षा – दिसम्बर, २०१८

| **कक्षा** – आचार्यः -२ (SEM-3) | **प्रश्नपत्रम् -२** (CC 5.3.7) NEW & OLD | **गुणाः** – ७० |
|---|---|---|
| **विषयः**- नव्यन्यायः | | **ग्रन्थः**- व्युत्पत्तिवादः (प्रथमाकारकम्) |
| **दिनाङ्कः** – ०५/१२/२०१८ | | **समयः** – १० तः १ |

### विभागः १

**प्रश्नः १ निम्नलिखितयोः द्वयोरेकस्य समाधानं सप्रसङ्गं लिखत।** ०५

१ अभेदसंसर्गकनियमं यथाग्रन्थं प्रतिपादयत।

२ वेदाः प्रमाणमित्यत्र समानवचनकत्वाभावेऽपि कथमभेदान्वयः ? व्याख्यात।

**प्रश्नः २ निम्नलिखितयोः द्वयोरेकस्य निबन्धात्मिका व्याख्या कार्या।** १०

१ 'निपातातिरिक्तनामार्थयोः साक्षाद्भेदेनान्वयस्याऽव्युत्पन्नत्वात्' उपपादयत।

२ 'स च क्वचिदभेदः क्वचिच्च तदतिरिक्त एव आधाराधेयप्रतियोग्यनुयोगिविषयविषयिभावादिः' सप्रसङ्गं निरूपयत।

### विभागः २

**प्रश्नः ३ निम्नलिखितयोः द्वयोरेकस्य उत्तरं सन्दर्भसहितं देयम्।** ०५

१ भेदान्वयबोधस्वरूपं निरूपयत।

२ स्वत्वसंसर्गतावादिमतं व्याख्यात।

**प्रश्नः ४ निम्नलिखितयोः एकस्य प्रश्नस्य निबन्धात्मकमुत्तरं लिखत।** १०

१ 'राज्ञः पुरुषः' इत्यत्र 'मैवं' इति सिद्धान्तं निरूपयत।

२ राज्ञः पुरुषः इत्यादौ स्वत्वादिसम्बन्धेन पुरुषादौ राजाद्यन्वयबोधस्वीकर्तॄणां मतं निरूपयत।

### विभागः ३

**प्रश्नः ५ निम्नलिखितयोः द्वयोरेकस्य सन्दर्भव्याख्या देया।** ०५

१ समवायसम्बन्धेन संख्यायाः प्रकृत्यर्थविशेषणत्वे को दोषः ? उपपादयत।

२ जानातीत्यत्र मणिसम्मतशाब्दबोधं प्रतिपादयत।

**प्रश्नः ६ निम्नलिखितयोः एकस्य प्रश्नस्य निबन्धात्मकमुत्तरं लिखत।** १०

१ 'सङ्ख्यापि प्रकृतेरर्थः' इति वैयाकरणमतं खण्डयत।

२ इदं पुनरिहावधेयमित्यादिग्रन्थोक्तदिशा वैयाकरणमतं समर्थयत।

## विभागः ४

**प्रश्नः ७ निम्नलिखितयोः एकस्य उत्तरं सन्दर्भसहितं देयम्।** ०५

१ 'दधि पश्यती'त्यत्र शाब्दबोधं निरूपयत।

२ पर्याप्तिसम्बन्धं व्याख्यात।

**प्रश्नः ८ निम्नलिखितयोः एकस्य प्रश्नस्य निबन्धात्मकमुत्तरं लिखत।** १०

१ एकवाक्यत्वं लक्षणमुक्त्वा एकत्र समन्वयत।

२ "पक्वानि भुङ्क्ते चैत्रः" "ओदनः पक्त्वा भुज्यते" इत्यादौ द्वितीया तृतीया अनुपपत्तिं निवार्य सिद्धान्तं व्याख्यात।

**प्रश्नः ९ निम्नलिखितप्रश्नेषु दशप्रश्नानामुत्तराणि एकवाक्येन यच्छन्तु।** १०

१ शाब्दबोधे पदार्थद्वयस्य संसर्गः कथं भासते?

२ कयोः भेदान्वयबोधः ?

३ स्वसमानविभक्तिकत्वं नाम किम् ?

४ वेदाः प्रमाणमित्यत्र विशेषणपदोत्तरविभक्त्या किं विवक्षितम् ?

५ असाधारणं नाम किम् ?

६ प्रकारतावादिमते विशेषणविभक्तेः अर्थः कः ?

७ विरुद्धविभक्तिराहित्यं किं रूपम् ?

८ कयोः अभेदान्वयबोधः सम्भवति ?

९ 'न कलञ्जं भक्षयेत्' इत्यत्र साक्षाद्भेदान्वयः इष्यते न वा ?

१० सामग्रीसत्त्वे अवश्यं.................. स्यात् ?

११ स्वत्वसम्बन्धः कीदृशः ?

१२ नित्यबहुवचनादि अबादिशब्दपरप्रथमाबहुवचनं सार्थकं उत न ?

१३ जानातीत्यादौ आख्यातस्य निरर्थकस्य के वदन्ति ?

१४ आख्यातद्विवचनबहुवचनयोः संख्याबोधकत्वमस्ति न वा ?

१५ विभक्तयः कति ?

-----xxxxx-----